National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2026;** 1(64): 56-60
© 2026 NJHSR
www.sanskritarticle.com

**हरिशंकरकुमारः**
शोधच्छात्रः,
संस्कृतविभागः,
दिल्लीविश्वविद्यालयः नई दिल्ली

**Correspondence:**
**हरिशंकरकुमारः**
शोधच्छात्रः,
संस्कृतविभागः,
दिल्लीविश्वविद्यालयः नई दिल्ली

# पाणिनिजैनेन्द्रव्याकरणयोः सुप्प्रत्ययानां तुलनात्मकमध्ययनम्

**हरिशंकरकुमारः**

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं पठितं'[1] जैनेन्द्रेण सूत्रं समाम्नातं तृतीयाध्यायस्य प्रथमे पादे[2]' उभयत्रापि न कोपि भेदो वर्तते मृद् इति जैनेन्द्रनये प्रातिपदिकसंज्ञाया वाचकः शब्दः ।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना अधिकारार्थं सूत्रमिदं प्रवृत्तं जैनेन्द्रेणापि अधिकारार्थमेव सूत्रमेतत् पठितम्। उभयत्रापि सूत्रमधिकारार्थमेव सूत्रस्यार्थोपि समान एव।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रमपाठि[3]' जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं सङ्कलितं[4]' उभयत्रापि सूत्रयोर्न कोपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना सु-औ-जस्-अम्-औट्-शस्-टा-भ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि-भ्याम्- भ्यस्-ङस्-ओस्-आम्-ङि-ओस्-सुप् इत्येते प्रत्ययाः ङ्यन्तेभ्यः आबन्तेभ्यः प्रातिपदिकेभ्यश्च निर्दिष्टाः। जैनेन्द्रेणापि सु-औ-जस्-अम्-औट्-शस्-टा-भ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि- भ्याम्-भ्यस्-ङस्-ओस्-आम्-ङि-ओस्-सुप् इत्येते प्रत्ययाः ङ्यन्तेभ्यः आबन्तेभ्यः मृद्भ्यश्च पठिताः इत्युभयोः न कोपि भेदः प्रत्ययेषु। रूपाणि समानान्येव - रामः। रामौ। रामाः।

**स्त्रीप्रत्ययविधानम्**

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्ययस्य प्रथमे पादे सूत्रं समाम्नातम्'[5] जैनेन्द्रेणापि तृतीयाध्यायस्य प्रथमे पादे सूत्रं व्यरचि'[6] उभयत्रापि सूत्रयोर्न कोपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना अजादिभ्यः अकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रीत्वविवक्षायां टाप्प्रत्ययस्य विधानं निर्दिष्टम् एवमेव जैनेन्द्रेणापि अजादिभ्यः अकारान्तेभ्यश्च मृद्भ्यः स्त्रीत्ववाच्ये टाप्प्रत्ययो निर्दिष्टः इत्युभयोर्न कोपि भेदो वर्तते। उभयत्रापि रूपाणि समानान्येव- अजा। एडका। अश्वा।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[7] जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रमग्रथि[8] उभयत्रापि सूत्रयोर्न कोपि भेदो वर्तते। पाणिनिना बहुवचनस्य प्रयोगो विहितः जैनेन्द्रेण एकवचनस्य। शब्दानां क्रमेपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना उगिद्भ्यः ऋदन्तेभ्यः नान्तेभ्यश्च प्रातिपदिकेभ्यः ङीप्प्रत्ययस्य विधानं निर्दिष्टम्। जैनेन्द्रेणापि समानरूपेण उगिद्भ्यः नान्तेभ्यः ऋकारस्त्रेभ्यः मृद्भ्यः ङीप्रत्ययस्य विधानं निर्दिष्टम्। पाणिनिना प्रत्यये पकारोनुबन्धार्थः पठितः परं जैनेन्द्रेण पकारो न पठितः। ङी उभयत्रापि ईकारोवशिष्यते रूपाणि तु समान्येव - पचन्ती। गोमती। भवती।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रमग्रथि' जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे समानरूपेण सूत्रमग्रथि' जैनेन्द्रेण अहशः कथनं कृतमिति उभयोरेको भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना वन्नन्तात् प्रातिपदिकात् रप्रत्ययस्यापि कथनं कृतं वर्तते जैनेन्द्रेण अहशान्तात् विहितात् वन्प्रत्ययान्तात् प्रातिपदिकात् रेफादेशः ङी च प्रकीर्तितः उभयत्रापि चकारात् ङीप्प्रत्ययस्य ग्रहणं भवति। रूपाणि तु समानान्येव-धीवरी। पीवरी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं' जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं प्रवृत्तं उभयत्रापि सूत्रयोः न कोपि भेदो वर्तते, प्रत्यये भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना मन्नन्तात् प्रातिपदिकात् स्त्रीत्वविवक्षायां टाप्प्रत्ययः निर्दिष्टः जैनेन्द्रेण मन्नन्तात् मृदः डाप्प्रत्ययस्य विधानं निर्दिष्टम् इति उभयोः अनुबन्धे पार्थक्यं वर्तते उभयत्रापि पकारोनुबन्धार्थः। जैनेन्द्रे डकारः द्वित्वसामर्थ्यादभस्यापि टेर्लोपः इत्येतदर्थं पाणिनिनये टकारः[9] इतययम् इत्युभयोः टिलोपः भवति। उभयत्रापि प्रत्यययोः आकारोवशिष्यते रूपाणि च समानान्येव भवन्ति- सीमां।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं[10] जैनेन्द्रेणापि तृतीयाध्यायस्य प्रथमे पादे सूत्रमग्रथि[11] उभयत्रापि सूत्रयोर्न कोपि भेदो वर्तते उभयोरपि, आभ्यां सूत्रभ्यां प्राक् सूत्रं प्राप्यते[12] "आभ्यां सूत्रभ्यामनुवृत्तिः वर्तते पादशब्दस्य।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना पादशब्दान्तात् ऋचिवाच्ये टाप्प्रत्ययस्य विधानं निर्दिष्टम् एवमेव जैनेन्द्रेणापि पादशब्दात् ऋचि वाच्ये टाप्प्रत्ययोसौ निर्दिष्टः। रूपाणि तु समानान्येव – द्विपदा ऋक्। त्रिपदा ऋक्।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं पठितं[13] जैनेन्द्रेणापि तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं[14] उभयत्रापि सूत्रयोः पार्थक्यं वर्तते केचन प्रत्ययाः जैनेन्द्रेण न परिगणिताः।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना टिदादिभ्यः प्रातिपदिकेभ्यः ठादिभ्यः प्रत्ययान्तेभ्यः प्रातिपदिकेभ्यश्च ङीप्प्रत्ययस्य विधानं निर्दिष्टम्। जैनेन्द्रेण टिडादिभ्यः प्रातिपदिकेभ्यः ढ, अण्, ठन्, ठञ्, क्करप् प्रत्ययान्तेभ्यः ङीप्रत्ययः निर्दिष्टः। मात्रजादीनां कथनं न कृतं जैनेन्द्रेण। रूपाणि तु समानान्येव- कुरुचरी। सौपर्णेयी। वैनतेयी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं[15] जैनेन्द्रणापि तृतीयाध्यायस्य प्रथमे पादे सूत्रं सङ्कलितं'[16] पाणिनिना चकारादनुकृष्टः प्रत्ययः जैनेन्द्रेण च प्रत्ययः अनुवृत्तः।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना यञन्तात् प्रातिपदिकात् ङीप्प्रत्ययस्य विधानं निर्दिष्टम् स्त्रीत्वविवक्षायां जैनेन्द्रेणापि समानरूपेण स्त्रीत्वविवक्षायां यञनतात् प्रातिपदिकात् ङीप्रत्ययस्य विधानं निर्दिष्टम्। उभयत्रापि रूपाणि समानान्येव- गार्गी। वात्सी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[17] जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं सङ्कलितं'[18] जैनेन्द्रेण केवलं प्रत्ययस्य ग्रहणं कृतम्।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना यञन्तात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ष्फप्रत्ययस्य विधानं निर्दिष्टम् अथ च जैनेन्द्रेणापि समानतया यञन्तात् प्रातिपदिकात् स्त्रीत्ववाच्ये फट्प्रत्ययस्य विधानां निर्दिष्टम् पाणिनिना पित्करणं ङीप्रत्ययार्थं निदिष्टम् अनेन जैनेन्द्रेण च टित्करणं ङीप्रत्ययार्थं निर्दिष्टम्। उभयत्रापि फ इत्यवशिष्यते तस्य आयनादेशो भवति तथा रूपाणि समानान्येव भवन्ति- गार्ग्यायणी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रमग्रथि'[19] जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[20] उभयत्रापि सूत्रयोः न कोपि भेदः वर्तते। सर्वत्रशब्दः पाणिनिना प्रयुक्तः तथा च सकलशब्दः जैनेन्द्रेण प्रयुक्तः इत्येव भेदः ।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना लोहितादिपठितेभ्यः यञन्तेभ्यः प्रातिपदिकेभ्यः ष्फप्रत्ययस्य विधानं निर्दिष्टं तथैव जैनेन्द्रेणापि लोहितादिगण-पठितेभ्यः प्रातिपदिकेभ्यः फप्रत्ययस्य विधानं निर्दिष्टम्। उभयत्रापि रूपाणि समानान्येव लौहित्यायनी। सांसित्यायनी ।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं[21] जैनेन्द्रेण च तृतीयाध्यायस्य प्रथमे पादे सूत्रमग्रथि'[22] जैनेन्द्रेण आसुरिशब्दस्य ग्रहणं कृतं पाणिनिना न तथा।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना कौरव्यमाण्डूकाभ्यां ष्फप्रत्ययस्य विधानं निर्दिष्टम्। जैनेन्द्रेण च कौरव्यासुरिमाण्डूकेभ्यः शब्देभ्यः फट्प्रत्ययोसौ निर्दिष्टः। रूपाणि यथा माण्डूकायनी, कौरव्यायणी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं पठितं'[23] जैनेन्द्रेण सूत्रं सङ्कलितं'[24] उभयत्रापि सूत्रयोर्भेदो वर्तते। पाणिनिना षित् पठितः जैनेन्द्रेण नो पठितः।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना षिगौरादिगणपठितेभ्यः प्रातिपदिकेभ्यः ङीष्प्रत्ययः निर्दिष्टः जैनेन्द्रेण गौरादिगणपठितेभ्यः प्रातिपदिकेभ्यः ङीप्रत्ययस्य विधानं निर्दिष्टम् इतयुभयोः प्रत्यययोः भेदो वर्तते। पाणिनिना ङीष् इति षकारोनुबन्धार्थः पठितः इत्येव भेदः। रूपाणि समानानि- गौरी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं पठितं[25]' एवमेव जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[26] पाणिनिना प्रथमे तथा च जैनेन्द्रेण अनन्त्ये पठितमित्येव भेदः। अर्थस्तु समान एव उभयोः।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना प्रथमे वयसि वर्तमानात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ङीप्प्रत्ययो निर्दिष्टः जैनेन्द्रेण अनन्त्ये वयसि वर्तमानातज् प्रातिपदिकात् ङीप्रत्ययो विहितो वर्तते इत्युभयोर्न कोपि भेदो वर्तते। रूपाणि यथा - कुमारी। किशोरी। वर्करी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं[27] जैनेन्द्रेणापि सूत्रं प्रवृत्तं[28] उभयत्रापि सूत्रयोर्न कोपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना प्रमाणे यः पुरुषस्तदन्तात् विकल्पेन ङीष्प्रत्ययो निर्दिष्टः एवमेव जैनेन्द्रेणापि प्रमाणे यः पुरुषस्तदन्तात् अन्यतरस्यां ङीप्रत्ययो विहितः। उभयोः प्रत्यययोः भेदो वर्तते पाणिनिना ङीप् तथा ङी जैनेन्द्रेण पठितः उभयत्रापि ईकारोवशिष्यते रूपाणि समानान्येव- द्विपुरुषा, द्विपुरुषी। त्रिपुरुषा, त्रिपुरुषी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रमग्रथि'[29] जैनेन्द्रेण च तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[30] उभयत्रापि सूत्रयोर्न कोपि भेदः। चकारात् पाणिनिना डीप्प्रत्ययस्य कथनं कृतं जैनेन्द्रेण च अनुवृत्तः ङीप्रत्ययः।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना बह्वादिगणपठितेभ्यः प्रातिपदिकेभ्यः विभाषया स्त्रीत्वविवक्षायां ङीष्प्रत्ययः पठितः जैनेन्द्रेण बह्वादिगणपठितेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वविवक्षायां विकल्पेन ङीप्रत्ययः निर्दिष्टः इत्युभयोः न भेदो वर्तते। रूपाणि तु समानान्येव- बहुः। बह्वी। पद्धतिः। पद्धती।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[31] जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[32] उभयत्रापि सूत्रयोर्भेदो वर्तते। तुशब्दः बहुलशब्दश्च जैनेन्द्रेण पठितः पाणिनिना अनुदात्तशब्दः तोपधशब्दः च पठितः।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना वर्णवाचिनः प्रातिपदिकात् तोपधात् तकारस्य स्थाने नकारादेशः उपदिष्टः जैनेन्द्रेणापि समानरूपेण वर्णवाचिनो मृदः स्त्रीत्वविक्षायां बहुलतया ङीप्रत्ययः तकारस्य नकारादेशश्च निर्दिष्टः। उभयत्रापि रूपाणि समानान्येव - एता। एणी। रोहिता। रोहिणी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रमग्रथि' जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रम्पठितं[33] उभयत्रापि सूत्रयोः शब्दानां क्रममतिरिच्य न कोपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना जानपदादिभ्यः प्रातिपदिकेभ्यः स्त्रीत्वविवक्षायां ङीष् प्रत्ययोसौ उपदिष्टः। जैनेन्द्रेण च कुण्डादिभ्यः प्रातिपदिकेभ्यः स्त्रीत्वविवक्षायां ङीप्रत्ययो निर्दिष्टः। प्रत्ययमतिरिच्य न कोपि भेदो वर्तते। प्रत्ययेपि ईकारोवशिष्यते उभयत्रापि। रूपाणि समानान्येव जानपदी। कुण्डी। गोणी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं पठितं[34]' जैनेन्द्रेणापि तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाकलितं[35] इत्येवम्प्रकारेण उभयोर्न कोपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना पूतक्रतुशब्दात् ङीष्प्रत्ययस्तथा रैकारान्तादेशः निर्दिष्टः जैनेन्द्रेणापि समानरूपेण प्रत्ययासौ विनिर्दिष्टः। रूपाणि समानान्येव - पूतक्रतायी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रमग्रथि[36] जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं व्यरचि[37] उभयोः न कोपि भेदो वर्तते पाणिनिना वेति पदं व्याहृतं जैनेन्द्रेण चेति पदम् इत्येव भेदः।

**प्रत्ययस्य स्वरूपम्**

पाणिनिना मनुशब्दात् स्त्रीत्वविवक्षायां पुंयोगात् ऐकारादेशः औकारादेशश्च निर्दिष्टः जैनेन्द्रेणापि समानरूपेण स्त्रीत्वविवक्षायां मनुशब्दात् ऐकारादेशः औकारादेशश्च निर्दिष्टो वर्तते। रूपाणि समानान्येव - मनावी, मनायी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं व्यरचि[38]' जैनेन्द्रेण च तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[39] उभयत्रापि क्रममतिरिच्य कोपि भेदो न दृश्यते।

**प्रत्ययस्वरूपम्-**

पाणिनिना इन्द्रादिभ्यः प्रातिपदिकेभ्यः आनुक्प्रत्ययः निर्दिष्टः ततः ङीष्प्रत्ययोपि जैनेन्द्रणापि वरुणादिभ्यः प्रातिपदिकेभ्यः आनुक् ततः ङीप्रत्ययोपि उपदिष्टः। आनुक् इत्यत्र आन इत्येवावशिष्यते। रुपाणि समानान्येव- वरुणानी, भवानी, शर्वानी, रुद्रामी ।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रमग्रथि'[40] जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं व्यरचि[41] उभयत्रापि सूत्रयोः न कोपि भेदो वर्तते। जैनेन्द्रेण आदिशब्दः प्रयुक्तः पाणिनिना च पूर्वशब्दः प्रयुक्तः।

**प्रत्यय स्वरूपम्-**

पाणिनिना क्रतुशब्दात् करणार्थकात् स्त्रीत्वविवक्षायां ङीष् प्रत्ययः निर्दिष्टः जैनेन्द्रेण च समानरुपेण क्रीतशब्दात् मृदः करणादेः ङीप्रत्ययो निर्दिष्टः। उभयत्रापि रुपाणि समानान्येव- वात्रक्रीती, वसनक्रीती।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं व्यरचि'[42] जैनेन्द्रेण तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं'[43] उभयत्रापि सूत्रयोर्न कोपि भेदो वर्तते। पाणिनिना पूर्वशब्दः प्रयुक्तः जैनेन्द्रेण आदिशब्दः इत्युभयोर्भेदो वर्तते।

**प्रत्ययस्वरूपम्-**

अस्वाङ्गादिकात् क्तान्तात् ङीप्प्रत्ययो भवति पाणिनिनिर्देशानुसारं जैनेन्द्रेण निर्दिष्टं अस्वाङ्गपूर्वकात् क्तान्तात् ङीप्प्रत्ययो निर्दिष्टः इत्युभयत्रापि न कोपि भेदो वर्तते। रुपाण्यपि समानानि, सारङ्गजग्धी, सारङ्गजग्धा।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रमग्रथि'[44] जैनेन्द्रेणापि तृतीयाध्यायस्य प्रथमे पादे सूत्रं व्यरचि[45] उभयत्रापि सूत्रयोः न कोपि भेदो वर्तते अस्फोडशब्दः असंयोगोपधवाच्यः तथा च नीयशब्दः उपसर्जनशब्दवाच्यः इत्येवम्प्रकारेण उभयोर्न कोपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना उपसर्जनपूर्वकात् स्वाङ्गवाचकात् वा असंयोगोपधात् प्रातिपदिकात् ङीष् प्रत्ययो निर्दिष्टः तथा च जैनेन्द्रेणापि समानतया ङीप्रत्ययस्योपदेशो विहितः। उभयत्रापि प्रत्यययोः ईकार एव अवशिष्यते रूपाणि च समानान्येव भवन्ति- दीर्घकेशी। दीर्घकेशा। गौरमुखी। गौरमुखा।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं[46]' जैनेन्द्रेणापि तृतीयाध्यायस्य प्रथमे पादे सूत्रं समाम्नातं[47] इत्युभयोः सूत्रयोर्न कोपि भेदो वर्तते चकारमतिरिच्य।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना स्वाङ्गवाचकेभ्यः उपसर्जनेभ्यः नासिका-उदर-ओष्ठ-जङ्घा-दन्त-कर्ण- शृङ्गेभ्यः ङीष् प्रत्ययो निर्दिष्टः एवमेव जैनेन्द्रेणापि प्रातिपदिकेभ्यः स्वाङ्गवाचकेभ्य उपसर्जनेभ्यः नासिका-उदर-जङ्गा-दन्त-कर्ण-शृङ्गेभ्यः ङीप्रत्ययो निर्दिष्टः। उदाहरणानि- दीर्घनासिका। तनूदरी, तनूदरा।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं ग्रथितं'[48] जैनेन्द्रेण च सूत्रं समाम्नातं'[49] अत्र अङः इति अस्त्रियः वाचकः शब्दः शेषस्तु समान एव।

**प्रत्ययस्य स्वरुपम्-**

पाणिनिना जातिवाचिना स्त्रीभिन्नविषयात् अयोपधात् प्रातिपदिकात् ङीष् प्रत्ययो निर्दिष्टः एवमेव जैनेन्द्रेणापि जातिवाचकात् स्त्रीभिन्नविषयकात् अयोपधात् प्रातिपदिकात् ङीप्रत्ययो निर्दिष्टः इत्येवम्प्रकारेण उभयोर्न कोपि भेदो दृश्यते। रूपाणि समानान्येव - कुक्कुटी। ब्राह्मणी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं व्यरचि'[50] जैनेन्द्रेण च तृतीयाध्यायस्य प्रथमे पादे च सूत्रमग्रथि[51] इत्येवम्प्रकारेण उभयोर्न कोपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना पाकादिभ्यः प्रातिपदिकेभ्यः स्त्रीत्वविवक्षायां ङीप्प्रत्ययो निर्दिष्टः जैनेन्द्रेणापि एतेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वविवक्षायां ङीप्रत्ययो विहितः इत्युभयोर्न कोपि भेदो वर्तते। रूपाण्यपि समानान्येव ओदनपाकी। पाकी। यूषिककणी। शष्कुकर्णी। शालिपर्णी। शङ्खक्षण पुराणी।

**सूत्रस्य स्वरूपम्-**

पाणिनिना चतुर्थाध्यायस्य प्रथमे पादे सूत्रं व्यरचि'[52] जैनेन्द्रेणापि तृतीयाध्यायस्य प्रथमे पादे सूत्रं व्यरचि'[53] उभयत्रापि सूत्रयोः अनुबन्धमतिरिच्य न कोपि भेदो वर्तते।

**प्रत्ययस्य स्वरूपम्-**

पाणिनिना उकारान्तात् मनुष्यवाचकात् प्रातिपदिकात् ऊङ्प्रत्ययस्य विधानं निर्दिष्टम् अथ च जैनेन्द्रेणापि उकारान्तात् प्रातिपदिकात् मनुष्यवाचकात् ऊरूप्रत्ययस्य विधानं निर्दिष्टम् इत्युभयोः ङित्करणमतिरिच्य न कोपि भेदो वर्तते। उभयत्रापि ऊ इत्येवाव-शिष्यते रूपाणिसमानान्येव - कुरूः, इक्ष्वाकूः।

**उपसंहारः**

एतस्मिन् अध्याये सुप्प्रत्ययविधानस्य तथा स्त्रीप्रत्ययविधानस्य विषये पाणिनिजैनेन्द्रयोः तुलनात्मकमध्ययनं कृतम्। उभयोरपि आचार्ययोः सूत्राणि स्वरूपेण अर्थेन च सामान्यं भजन्ते। प्रायशः प्रत्ययविधानं रूपनिर्माणं च साम्यमेव। भेदस्तु केवलं सूत्रपाठक्रमे अध्यायपादव्यवस्थायामनुबन्धानां ग्रहणाग्रहणे दृश्येते।

**पादटीका –**

1'ङ्याप्प्रातिपदिकात् अ. सू. ४.१.12

2ङ्यान्मृदः जै. सू. ३.१.१

3स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्यांभ्यस्ङसिभ्याम्भ्यस्ङसोसांड्योस्सुप् अ. सू. ४.१.२*

4स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्यांभ्यस्ङसोसांड्योस्सुप् जै. सू. ३.१.२

5अजाद्यतष्टाप् अ. सू. ४.१.12

6अजाद्यतष्टाप् जै. सू. ३.१.४

7उगितश्च अ. सू. ४.१.६ ऋन्नेभ्यो ङीप् अ. सू. ४.१.५

8'उगिदन्नान्डी जै. सू. ३.१.६

9'टेः अ. सू. ६.४.१४३

10'टाबृचि अ. सू. ४.१.९

11'टाबृचि जै. सू. ३.१.१६

12पादोन्यतरस्याम् अ. सू. ४.१.९* पादो वा जै. सू. ३.१.१५

13टिड्ढाणद्भूयसज्दघ्नमात्रच्तयप्ठक्ठञ्कञ्क्वरपः अ. सू. ४.१.१५

14टिड्ढाणठण्ठक्करपः जै. सू. ३.१.१८

15यञश्च अ. सू. ४.१.१६

16यञः जै. सू. ३.१.१९

17प्राचां ष्फः तद्धितः अ. सू. ४.१.१७

18फट् जै. सू. ३.१.२०

19सर्वत्र लोहितादिकतन्तेभ्यः अ. सू. ४.१.१८

20लोहितादिसकलान्तात् जै. सू. ३.१.२१

21'कौरव्यमाण्डुकाभ्यां च अ. सू. ४.१.१९

22'कौरव्यासुरिमाण्डूकात् जै. सू. ३.१.२२

23'षिगौरादिभ्यश्च अ. सू. ४.१.४१

24गौरादेः जै. सू. ३.१.२३

25वयसि प्रथमे अ. सू. ४.१.२०

26वयस्यनन्त्ये जै. सू. ३.१.२४

27'पुरुषात् प्रमाणेऽन्यतरस्याम् अ. सू. ४.१.२४

28'पुरुषत्प्रमाणे वा जै. सू. ३.१.२९

29बह्वादिभ्यश्च अ. सू. ४.१.४५

30बह्वादेः जै. सू. ३.१.३१

31वर्णादनुदात्तात्तेपधातो नः अ. सू. ४.१.३९

32वर्णाद्विहलं तो नस्तु जै. सू. ३.१.३६

33कुण्डगोणस्थलभाजनागकुश-कामुकबरादत्रमावपनाकृत्रिमा-श्राणास्थौल्यायोविकारमैथुनेच्छाकेशवेषु जै. सू. ३.१.३७

34पूतक्रतोरै च अ. सू. ४.१.३६

35पूतक्रतोरै च जै. सू. ३.१.३९

36मनोरौ वो अ. सू

37मनोरौ च जै. सू

38इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् अ. सू. ४.१.४९

39वरुणभवशर्वरुद्रेन्द्रमृडहिमारण्ययवयवनमानुत्याचार्यानामानुक् जै. सू. ३.१.४२ *

40क्रीतात्करणपूर्वात् अ. सू. ४.१.५०

41क्रीतात्करणादेः जै. सू. ३.१.४३

42अस्वाङ्गपूर्वपदाद्वा अ. सू. ४.१.५३

43वाऽस्वाङ्गादेः जै. सू. ३.१.४६

44स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् अ. सू. ४.१.५४

45स्वाङ्गान्नीचोऽस्फोडः जै. सू. ३.१.४७

46'नासिकोदरौष्ठजङ्घादन्तकर्णश्रृङ्गाच्च अ. सू. ४.१.५५

47नासिकोदरौष्टजङ्घादनतकर्णश्रृङ्गात् जै. सू. ३.१.४८

48जातेरस्त्रीविषयादयोपधात् अ. सू. ४.१.६३

49जातेरयोङः जै. सू. ३.१.५३

50पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च अ. सू. ४.१.६४

51पाककर्णपर्णपुष्पफलमूलवालद्योः जै. सू. ३.१.५४

52ऊङुतः अ. सू. ४.१.६६

53ऊरुतः जै. सू. ३.१.५६